# Raghuvansha 6 by Kalidas

# રઘુવંશં સર્ગઃ ૬ કાલિદાસકૃતમ્

## Document Information

Text title : raghuvansha8

File name : raghuvansha6.itx

Category : major_works, kAlidAsa

Location : doc_z_misc_major_works

Author : kalidasa

Transliterated by : Arvind Kolhatkar akolhatkar at rogers.com

Proofread by : Arvind Kolhatkar akolhatkar at rogers.com

Latest update : April 28, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

Raghuvansha 6 by Kalidas

# રઘુવંશં સર્ગઃ ૬ કાલિદાસકૃતમ્

સ તત્ર મઞ્ચેષુ મનોજ્ઞવેષાન્સિંહાસનસ્થાનુપચારવત્સુ ।
વૈમાનિકાનાં મરુતામપશ્યદાકૃષ્ટલીલાન્નરલોકપાલાન્ ॥ ૬-૧॥

રતેર્ગૃહીતાનુનયેન કામં પ્રત્યર્પિતસ્વાઙ્ગમિવેશ્વરેણ ।
કાકુત્સ્થમાલોકયતાં નૃપાણાં મનો બભૂવેન્દુમતીનિરાશમ્ ॥ ૬-૨॥

વૈદર્ભનિર્દિષ્ટમસૌ કુમારઃ કॢપ્તેન સોપાનપથેન મઞ્ચમ્ ।
શિલાવિભઙ્ગૈર્મૃગરાજશાવસ્તુઙ્ગં નગોત્સઙ્ગમિવારુરોહ ॥ ૬-૩॥

પરાર્ધ્યવર્ણાસ્તરણોપપન્નમાસેદિવાન્રત્નવદાસનં સઃ ।
ભૂયિષ્ઠમાસીદુપમેયકાન્તિર્મયૂરપૃષ્ઠાશ્રયિણા ગુહેન ॥ ૬-૪॥

તાસુ શ્રિયા રાજપરંપરાસુ પ્રભાવિશેષોદયદુર્નિરીક્ષ્યઃ ।
સહસ્રધાત્મા વ્યરુચદ્વિભક્તઃ પયોમુચાં પઙ્ક્તિષુ વિદ્યુતેવ ॥ ૬-૫॥

તેષાં મહાર્હાસનસંસ્થિતાનામુદારનેપથ્યભૃતાં સ મધ્યે ।
રરાજ ધામ્ના રઘુસૂનુરેવ કલ્પદ્રુમાણામિવ પારિજાતઃ ॥ ૬-૬॥

નેત્રવ્રજાઃ પૌરજનસ્ય તસ્મિન્વિહાય સર્વાન્નૃપતીન્નિપેતુઃ ।
મદોત્કટે રેચિતપુષ્પવૃક્ષા ગન્ધદ્વિપે વન્ય ઇવ દ્વિરેફાઃ ॥ ૬-૭॥

અથ સ્તુતે બન્દિભિરન્વયજ્ઞૈઃ સોમાર્કવંશ્યે નરદેવલોકે ।
સંચારિતે ચાગુરુસારયોનૌ ધૂપે સમુત્સર્પતિ વૈજયન્તીઃ ॥ ૬-૮॥

પુરોપકણ્ઠોપવનાશ્રયાણાં કલાપિનામુદ્ધતનૃત્તહેતૌ ।
પ્રધ્માતશઙ્ખે પરિતો દિગન્તાંસ્તૂર્યસ્વને મૂર્ચ્છતિ મઙ્ગલાર્થે ॥ ૬-૯॥

મનુષ્યવાહ્યં ચતુરન્તયાનમધ્યાસ્ય કન્યા પરિવારશોભિ ।
વિવેશ મઞ્ચાન્તરરાજમાર્ગં પતિંવરા કॢપ્તવિવાહવેષા ॥ ૬-૧૦॥

તસ્મિન્વિધાનાતિશયે વિધાતુઃ કન્યામયે નેત્રશતૈકલક્ષ્યે ।
નિપેતુરન્તઃકરણૈર્નરેન્દ્રા દેહૈઃ સ્થિતાઃ કેવલમાસનેષુ ॥ ૬-૧૧॥

તાં પ્રત્યભિવ્યક્તમનોરથાનાં? મહીપતીનાં પ્રણયાગ્રદૂત્યઃ ।
પ્રવાલશોભા ઇવ પાદપાનાં? શ ृ ઙ્ગારચેષ્ટા વિવિધા બભૂવુઃ ॥ ૬-૧૨॥

કશ્ચિત્કરાભ્યામુપગૂઢનાલમાલોલપત્રાભિહતદ્વિરેફમ્ ।
રજોભિરન્તઃ પરિવેષબન્ધિ લીલારવિન્દં ભ્રમયાંચકાર ॥ ૬-૧૩॥

વિસ્રસ્તમંસાદપરો વિલાસી રત્નાનુવિદ્ધાઙ્ગદકોટિલગ્નમ્ ।
પ્રાલમ્બમુત્કૃષ્ય યથાવકાશં નિનાય સાચીકૃતચારુવક્ત્રઃ ॥ ૬-૧૪॥

આકુઞ્ચિતાગ્રાઙ્ગુલિના તતોઽન્યઃ કિઞ્ચિત્સમાવર્જિતનેત્રશોભઃ ।
તિર્યગ્વિસંસર્પિનખપ્રભેણ પાદેન હૈમં વિલિલેખ પીઠમ્ ॥ ૬-૧૫॥

નિવેશ્ય વામં ભુજમાસનાર્ધે તત્સંનિવેશાત્ અધિકોન્નતાંસઃ ।
કશ્ચિદ્વિવૃત્તત્રિકભિન્નહારઃ સુહૃત્સમાભાષણતત્પરોઽભૂત્ ॥ ૬-૧૬॥

વિલાસિનીવિભ્રમદન્તપત્રમપાણ્ડુરં કેતકબર્હમન્યઃ ।
પ્રિયાનિતમ્બોચિતસંનિવેશૈર્વિપાટયામાસ યુવા નખાગ્રૈઃ ॥ ૬-૧૭॥

કુશેશયાતામ્રતલેન કશ્ચિત્કરેણ રેખાધ્વજલાઞ્છનેન ।
રત્નાઙ્ગુલીયપ્રભયાનુવિદ્ધાનુદીરયામાસ સલીલમક્ષાન્ ॥ ૬-૧૮॥

કશ્ચિદ્યથાભાગમવસ્થિતેઽપિ સ્વસંનિવેશાદ્વ્યતિલઙ્ઘિનીવ ।
વજ્રાંશુગર્ભાઙ્ગુલિરન્ધ્રમેકં વ્યાપારયામાસ કરં કિરીટે ॥ ૬-૧૯॥

તતો નૃપાણાં શ્રુતવૃત્તવંશા પુંવત્પ્રગલ્ભા પ્રતિહારરક્ષી ।
પ્રાક્સંનિકર્ષં મગધેશ્વરસ્ય નીત્વા કુમારીમવદત્સુનન્દા ॥ ૬-૨૦॥

અસૌ શરણ્યઃ શરણોન્મુખાનામગાધસત્ત્વો મગધપ્રતિષ્ઠઃ ।
રાજા પ્રજારઞ્જનલબ્ધવર્ણઃ પરંતપો નામ યથાર્થનામા ॥ ૬-૨૧॥

કામં નૃપાઃ સન્તુ સહસ્રશોઽન્યે રાજન્વતીમાહુરનેન ભૂમિમ્ ।
નક્ષત્રતારાગ્રહસંકુલાપિ જ્યોતિષ્મતી ચન્દ્રમસૈવ રાત્રિઃ ॥ ૬-૨૨॥

ક્રિયાપ્રબન્ધાદયમધ્વરાણામજસ્રમાહૂતસહસ્રનેત્રઃ ।
શચ્યાશ્ચિરં પાણ્ડુકપોલલમ્બાન્મન્દારશૂન્યાનલકાંશ્ચકાર ॥ ૬-૨૩॥

અનેન ચેદિચ્છસિ ગૃહ્યમાણં પાણિં વરેણ્યેન કુરુ પ્રવેશે ।
પ્રાસાદવાતાયનસંસ્થિતાનાં નેત્રોત્સવં પુષ્પપુરાઙ્ગનાનામ્ ॥ ૬-૨૪॥

એવં તયોક્તે તમવેક્ષ્ય કિંચિદ્વિસ્રંસિદૂર્વાઙ્કમધૂકમાલા ।
ઋજુપ્રણામક્રિયયૈવ તન્વી પ્રત્યાદિદેશૈનમભાષમાણા ॥ ૬-૨૫॥

તાં સૈવ વેત્રગ્રહણે નિયુક્તા રાજાન્તરં રાજસુતાં નિનાય ।
સમીરણોત્થેવ તરંગરેખા પદ્માન્તરં માનસરાજહંસીમ્ ॥ ૬-૨૬॥

જગાદ ચૈનામયમઙ્ગનાથઃ સુરાઙ્ગનાપ્રાર્થિતયૌવનશ્રીઃ ।
વિનીતનાગઃ કિલ સૂત્રકારૈરૈન્દ્રં પદં ભૂમિગતોઽપિ ભુઙ્ક્તે ॥ ૬-૨૭॥

અનેન પર્યાસયતાશ્રુબિન્દૂન્મુક્તાફલસ્થૂલતમાન્સ્તનેષુ ।
પ્રત્યર્પિતાઃ શત્રુવિલાસિનીનામુન્મુચ્ય સૂત્રેણ વિનૈવ હારાઃ ॥ ૬-૨૮॥

નિસર્ગભિન્નાસ્પદમેકસંસ્થમસ્મિન્દ્વયં શ્રીશ્ચ સરસ્વતી ચ ।
કાન્ત્યા ગિરા સૂનૃતયા ચ યોગ્યા ત્વમેવ કલ્યાણિ તયોસ્તૃતીયા ॥ ૬-૨૯॥

અથાઙ્ગરાજદવતાર્ય ચક્ષુર્યાહીતિ જન્યામવદત્કુમારી ।
નાસૌ ન કામ્યો ન ચ વેદ સમ્યગ્દ્રષ્ટું ન સા ભિન્નરુચિર્હિ લોકઃ ॥ ૬-૩૦॥

તતઃ પરં દુઃપ્રસહં દ્વિષદ્ભિર્નૃપં નિયુક્તા પ્રતિહારભૂમૌ ।
નિદર્શયામાસ વિશેષદૃશ્યમિન્દું નવોત્થાનમિવેન્દુમત્યૈ ॥ ૬-૩૧॥

અવન્તિનાથોઽયમુગ્રબાહુર્વિશાલવક્ષાસ્તનુવૃત્તમધ્યઃ ।
આરોપ્ય ચક્રભ્રમમુષ્ણતેજાસ્ત્વષ્ટ્રેવ યત્નોલ્લિખિતો વિભાતિ ॥ ૬-૩૨॥

અસ્ય પ્રયાણેષુ સમગ્રશક્તેરગ્રેસરૈર્વાજિભિરુત્થિતાનિ ।
કુર્વન્તિ સામન્તશિખામણીનાં પ્રભાપ્રરોહાસ્તમયં રજાંસિ ॥ ૬-૩૩॥

અસૌ મહાકાલનિકેતનસ્ય વસન્નદૂરે કિલ ચન્દ્રમૌલેઃ ।
તમિસ્રપક્ષેઽપિ સહપ્રિયાભિર્જ્યોત્સ્નાવતો નિર્વિશતિ પ્રદોષાન્ ॥ ૬-૩૪॥

અનેન યૂના સહ પાર્થિવેન રમ્ભોરુ કચ્ચિન્મનસો રુચિસ્તે ।
સિપ્રાતરંગાનિલકમ્પિતાસુ વિહર્તુમુદ્યાનપરંપરાસુ ॥ ૬-૩૫॥

તસ્મિન્નભિદ્યોતિતબન્ધુપદ્મે પ્રતાપસંશોષિતશત્રુપઙ્કે ।
બબન્ધ સા નોત્તમસૌકુમાર્યા કુમુદ્વતી ભાનુમતીવ ભાવમ્ ॥ ૬-૩૬॥

તામગ્રતસ્તામરસાન્તરાભામનૂપરાજસ્ય ગુણૈરનૂનામ્ ।
વિધાય સૃષ્ટિં લલિતાં વિધાતુર્જગાદ ભૂયઃ સુદતીં સુનન્દા ॥ ૬-૩૭॥

સઙ્ગ્રામનિર્વિષ્ટસહસ્રબાહુરષ્ટાદશદ્વીપનિખાતયૂપઃ ।
અનન્યસાધારણરાજશબ્દો બભૂવ યોગી કિલ કાર્તવીર્યઃ ॥ ૬-૩૮॥

અકાર્યચિન્તા સમકાલમેવ પ્રાદુર્ભવંશ્ચાપધરઃ પુરસ્તાત્ ।

અન્તઃશરીરેષ્વપિ યઃ પ્રજાનાં પ્રત્યાદિદેશાવિનયં વિનેતા ॥ ૬-૩૯॥

જ્યાબન્ધનિષ્પન્દભુજેન યસ્ય વિનિઃશ્વસદ્વક્ત્રપરંપરેણ ।
કારાગૃહે નિર્જિતવાસવેન લઙ્કેશ્વરેણોષિતમા પ્રસાદાત્ ॥ ૬-૪૦॥

તસ્યાન્વયે ભૂપતિરેષ જાતઃ પ્રતીપ ઇત્યાગમવૃદ્ધસેવી ।
યેનઃ શ્રિયઃ સંશ્રયદોષરૂઢં સ્વભાવલોલેત્યયશં પ્રમૃષ્ટમ્ ॥ ૬-૪૧॥

આયોધને કૃષ્ણગતિં સહાયમવાપ્ય યઃ ક્ષત્રિયકાલરાત્રિમ્ ।
ધારાં શિતાં રામપરશ્વધસ્ય સંભાવયત્યુત્પલપત્રસારામ્ ॥ ૬-૪૨॥

અસ્યાઙ્કલક્ષ્મીર્ભવ દીર્ઘબાહોર્માહિષ્મતીવપ્રનિતમ્બકાઞ્ચીમ્ ।
પ્રાસાદજાલૈર્જલવેણિરમ્યાં રેવાં યદિ પ્રેક્ષિતુમસ્તિ કામઃ ॥ ૬-૪૩॥

તસ્યાઃ પ્રકામં પ્રિયદર્શનોઽપિ ન સ ક્ષિતીશો રુચયે બભૂવ ।
શરત્પ્રમૃષ્ટામ્બુધરોપરોધઃ શશીવ પર્યાપ્તકલો નલિન્યાઃ ॥ ૬-૪૪॥

સા શૂરસેનાધિપતિં સુષેણમુદ્દિશ્ય લોકાન્તરગીતકીર્તિમ્ ।
આચારશુદ્ધોભયવંશદીપં શુદ્ધાન્તરક્ષ્યા જગદે કુમારી ॥ ૬-૪૫॥

નીપાન્વયઃ પાર્થિવ એષ યજ્વા ગુણૈર્યમાશ્રિત્ય પરસ્પરેણ ।
સિદ્ધાશ્રમં શાન્તમિવેત્ય સત્ત્વૈર્નૈસર્ગિકોઽપ્યુત્સસૃજે વિરોધઃ ॥ ૬-૪૬॥

યસ્યાત્મગેહે નયનાભિરામા કાન્તિર્હિમાંશોરિવ સંનિવિષ્ટા ।
હર્મ્યાગ્રસંરૂઢતૃણાઙ્કુરેષુ તેજોઽવિષહ્યં રિપુમન્દિરેષુ ॥ ૬-૪૭॥

યસ્યાવરોધસ્તનચન્દનાનાં પ્રક્ષાલનાદ્વારિવિહારકાલે ।
કલિન્દકન્યા મથુરાં ગતાપિ ગઙ્ગોર્મિસંસક્તજલેવ ભાતિ ॥ ૬-૪૮॥

ત્રસ્તેન તાર્ક્ષ્યાત્કિલ કાલિયેન મણિં વિસૃષ્ટં યમુનૌકસા યઃ ।
વક્ષઃસ્થલવ્યાપિરુચં દધાનઃ સકૌસ્તુભં હ્રેપયતીવ કૃષ્ણમ્ ॥ ૬-૪૯॥

સંભાવ્ય ભર્તારમમું યુવાનં મૃદુપ્રવાલોત્તરપુષ્પશય્યે ।
વૃન્દાવને ચૈત્રરથાદનૂને નિર્વિશ્યતાં સુન્દરિ યૌવનશ્રીઃ ॥ ૬-૫૦॥

અધ્યાસ્ય ચામ્ભઃપૃષતોક્ષિતાનિ શૈલેયગન્ધીનિ શિલાતલાનિ ।
કલાપિનાં પ્રાવૃષિ પશ્ય નૃત્યં કાન્તાસુ ગોવર્ધનકન્દરાસુ ॥ ૬-૫૧॥

નૃપં તમાવર્તમનોજ્ઞનાભિઃ સા વ્યત્યગાદન્યવધૂર્ભવિત્રી ।
મહીધરં માર્ગવશાદુપેતં સ્રોતોવહા સાગરગામિનીવ ॥ ૬-૫૨॥

અથાઙ્ગદાલિષ્ટભુજં ભુજિષ્યા હેમાઙ્ગદં નામ કલિઙ્ગનાથમ્ ।
આસેદુષીં સાદિતશત્રુપક્ષં બાલામબાલેન્દુમુખીં બભાષે ॥ ૬-૫૩॥

અસૌ મહેન્દ્રાદિસમાનસારઃ પતિર્મહેન્દ્રસ્ય મહોદધેશ્ચ ।
યસ્ય ક્ષરત્સૈન્યગજચ્છલેન યાત્રાસુ યાતીવ પુરો મહેન્દ્રઃ ॥ ૬-૫૪॥

જ્યાઘાતરેખે સુભુજો ભુજાભ્યાં બિભર્તિ યશ્ચાપભૃતાં પુરોગઃ ।
રિપુશ્રિયાં સાઞ્જનબાષ્પસેકે બન્દીકૃતાનામિવ પદ્ધતી દ્વે ॥ ૬-૫૫॥

યમાત્મનઃ સદ્મનિ સંનિકૃષ્ટો મન્દ્રધ્વનિત્યાજિતયામતૂર્યઃ ।
પ્રાસાદવાતાયનદૃશ્યવીચિઃ પ્રબોધયત્યર્ણવ એવ સુપ્તમ્ ॥ ૬-૫૬॥

અનેન સાર્ધં વિહરામ્બુરાશેસ્તીરેષુ તાલીવનમર્મરેષુ ।
દ્વીપાન્તરાનીતલવઙ્ગપુષ્પૈરપાકૃતસ્વેદલવા મરુદ્ભિઃ ॥ ૬-૫૭॥

પ્રલોભિતાપ્યાકૃતિલોભનીયા વિદર્ભરાજાવરજા તયૈવમ્ ।
તસ્માદપાવર્તત દૂરકૃષ્ટા નીત્યેવ લક્ષ્મીઃ પ્રતિકૂલદૈવાત્ ॥ ૬-૫૮॥

અથોરગાખ્યસ્ય પુરસ્ય નાથં દૌવારિકી દેવસરૂપમેત્ય ।
ઇતશ્ચકોરાક્ષિ વિલોકયેતિ પૂર્વાનુશિષ્ટાં નિજગાદ ભોજ્યામ્ ॥ ૬-૫૯॥

પાણ્ડ્યોઽયમંસાર્પિતલમ્બહારઃ કૢપ્તાઙ્ગરાગો હરિચન્દનેન ।
આભાતિ બાલાતપરક્તસાનુઃ સનિર્ઝરોદ્ગાર ઇવાદ્રિરાજઃ ॥ ૬-૬૦॥

વિન્ધ્યસ્ય સંસ્તમ્ભયિતા મહાદ્રેર્નિઃશેષપીતોજ્ઝિતસિન્ધુરાજઃ ।
પ્રીત્યાશ્વમેધાવભૃથાર્દ્રમૂર્તેઃ સૌસ્નાતિકો યસ્ય ભવત્યગસ્ત્યઃ ॥ ૬-૬૧॥

અસ્ત્રં હરાદાપ્તવતા દુરાપં યેનેન્દ્રલોકાવજયાય દૃપ્તઃ ।
પુરા જનસ્થાનવિમર્દશઙ્કી સંધાય લઙ્કાધિપતિઃ પ્રતસ્થે ॥ ૬-૬૨॥

અનેન પાણૌ વિધિવદ્ગૃહીતે મહાકુલીનેન મહીવ ગુર્વી ।
રત્નાનુવિદ્ધાર્ણવમેખલાયા દિશઃ સપત્ની ભવ દક્ષિણસ્યાઃ ॥ ૬-૬૩॥

તામ્બૂલવલ્લીપરિણદ્ધપૂગાસ્વેલાલતાલિઙ્ગિતચન્દનાસુ ।
તમાલપત્રાસ્તરણાસુ રન્તું પ્રસીદ શશ્વન્મલયસ્થલીષુ ॥ ૬-૬૪॥

ઇન્દીવરશ્યામતનુર્નૃપોઽસૌ ત્વં રોચનાગૌરશરીરયષ્ટિઃ ।
અન્યોન્યશોભાપરિવૃદ્ધયે વાં યોગસ્તડિત્તોયદયોરિવાસ્તુ ॥ ૬-૬૫॥

સ્વસુર્વિદર્ભાધિપતેસ્તદીયો લેભેઽન્તરં ચેતસિ નોપદેશઃ ।
દિવાકરાદર્શનબદ્ધકોશે નક્ષત્રનાથાંશુરિવારવિન્દે ॥ ૬-૬૬॥

સંચારિણી દીપશિખેવ રાત્રૌ યં યં વ્યતીયાય પતિંવરા સા ।
નરેન્દ્રમાર્ગાટ્ટ ઇવ પ્રપેદે વિવર્ણભાવં સ સ ભૂમિપાલઃ ॥ ૬-૬૭॥

તસ્યાં રઘોઃ સૂનુરુપસ્થિતાયાં વૃણીત માં નેતિ સમાકુલોઽભૂત્ ।
વામેતરઃ સંશયમસ્ય બાહુઃ કેયૂરબન્ધોચ્છ્વસિતૈર્નુનોદ ॥ ૬-૬૮॥

તં પ્રાપ્ય સર્વાવયવાનવદ્યં વ્યાવર્તતાન્યોપગમાત્કુમારી ।
ન હિ પ્રફુલ્લં સહકારમેત્ય વૃક્ષાન્તરં કાઙ્ક્ષતિ ષટ્પદાલી ॥ ૬-૬૯॥

તસ્મિન્સમાવેશિતચિત્તવૃત્તિમિન્દુપ્રભામિન્દુમતીમવેક્ષ્ય ।
પ્રચક્રમે વક્તુમનુક્રમજ્ઞા સવિસ્તરં વાક્યમિદં સુનન્દા ॥ ૬-૭૦॥

ઇક્ષ્વાકુવંશ્યઃ કકુદં નૃપાણાં કકુત્સ્થ ઇત્યાહિતલક્ષણોઽભૂત્ ।
કાકુત્સ્થશબ્દં યત ઉન્નતેચ્છાઃ શ્લાઘ્યં દધત્યુત્તરકોસલેન્દ્રાઃ ॥ ૬-૭૧॥

મહેન્દ્રમાસ્થાય મહોક્ષરૂપં યઃ સંયતિ પ્રાપ્તપિનાકિલીલઃ ।
ચકાર બાણૈરસુરાઙ્ગનાનાં ગણ્ડસ્થલીઃ પ્રોષિતપત્રલેખાઃ ॥ ૬-૭૨॥

ઐરાવતસ્ફાલનવિશ્લથં યઃ સંઘટ્ટયન્નઙ્ગદમઙ્ગદેન ।
ઉપેયુષઃ સ્વામપિ મૂર્તિમગ્ર્યામર્ધાસનં ગોત્રભિદોઽધિતષ્ઠૌ ॥ ૬-૭૩॥

જાતઃ કુલે તસ્ય કિલોરુકીર્તિઃ કુલપ્રદીપો નૃપતિર્દિલીપઃ ।
અતિષ્ઠદેકોનશતક્રતુત્વે શક્રાભ્યસૂયાવિનિવૃત્તયે યઃ ॥ ૬-૭૪॥

યસ્મિન્મહીં શાસતિ વાણિનીનાં નિદ્રાં વિહારાર્ધપથે ગતાનામ્ ।
વાતોઽપિ નાસ્રંસયદંશુકાનિ કો લમ્બયેદાહરણાય હસ્તમ્ ॥ ૬-૭૫॥

પુત્રો રઘુસ્તસ્ય પદં પ્રશાસ્તિ મહાક્રતોર્વિશ્વજિતઃ પ્રયોક્તા ।
ચતુર્દિગાવર્જિતસંભૃતાં યો મૃત્પાત્રશેષામકરોદ્વિભૂતિમ્ ॥ ૬-૭૬॥

આરૂઢમદ્રીનુદધીન્વિતીર્ણં ભુજંગમાનાં વસતિં પ્રવિષ્ટમ્ ।
ઊર્ધ્વં ગતં યસ્ય ન ચાનુબન્ધિ યશઃ પરિચ્છેત્તુમિયત્તયાલમ્ ॥ ૬-૭૭॥

અસૌ કુમારસ્તમજોઽનુજાતસ્ત્રિવિષ્ટપસ્યેવ પતિં જયન્તઃ ।
ગુર્વીં ધુરં યો જગતસ્ય પિત્રા ધુર્યેણ દમ્યઃ સદૃશં બિભર્તિ ॥ ૬-૭૮॥

કુલેન કાન્ત્યા વયસા નવેન ગુણૈશ્ચ તૈસ્તૈર્વિનયપ્રધાનૈઃ ।
ત્વમાત્મનસ્તુલ્યમમું વૃણીષ્વ રત્નં સમાગચ્છતુ કાઞ્ચનેન ॥ ૬-૭૯॥

તતઃ સુનન્દાવચનાવસાને લજ્જાં તનૂકૃત્ય નરેન્દ્રકન્યા ।

દૃષ્ટ્યા પ્રસાદામલયા કુમારં પ્રત્યગ્રહીત્સંવરણસ્રજેવ ॥ ૬-૮૦॥

સા યૂનિ તસ્મિન્નભિલાષબન્ધં શશાક શાલીનતયા ન વક્તુમ્ ।
રોમાઞ્ચલક્ષ્યેણ સ ગાત્રયષ્ટિં ભિત્ત્વા નિરાક્રામદરાલકેશ્યાઃ ॥ ૬-૮૧॥

તથાગતાયાં પરિહાસપૂર્વં સખ્યાં સખી વેત્રભૃદાબભાષે ।
આર્યે વ્રજામોઽન્યત ઇત્યથૈનાં વધૂરસૂયાકુટિલં દદર્શ ॥ ૬-૮૨॥

સા ચૂર્ણગૌરં રઘુનન્દનસ્ય ધાત્રીકરાભ્યાં કરભોપમોરૂઃ ।
આસઞ્જયામાસ યથાપ્રદેશં કણ્ઠે ગુણં મૂર્તમિવાનુરાગમ્ ॥ ૬-૮૩॥

તયા સ્રજા મઙ્ગલપુષ્પમય્યા વિશાલવક્ષઃસ્થલલમ્બયા સઃ ।
અમંસ્ત કણ્ઠાર્પિતબાહુપાશાં વિદર્ભરાજાવરજાં વરેણ્યઃ ॥ ૬-૮૪॥

શશિનમુપગતેયં કૌમુદી મેઘમુક્તં
જલનિધિમનુરૂપં જહ્નુકન્યાવતીર્ણા ।
ઇતિ સમગુણયોગપ્રીતયસ્તત્ર પૌરાઃ
શ્રવણકટુ નૃપાણામેકવાક્યં વિવવ્રુઃ ॥ ૬-૮૫॥

પ્રમુદિતવરપક્ષમેકતસ્તત્ક્ષિતિપતિમણ્ડલમન્યતો વિતાનમ્ ।
ઉષસિ સર ઇવ પ્રફુલ્લપદ્મં કુમુદવનપ્રતિપન્નનિદ્રમાસીત્ ॥ ૬-૮૬॥

ઇતિ શ્રીરઘુવંશે મહાકાવ્યે કવિશ્રીકાલિદાસકૃતૌ
સ્વયંવરવર્ણનો નામ ષષ્ઠઃ સર્ગઃ ॥

Encoded and Proofread by Arvind Kolhatkar akolhatkar at rogers.com

*Raghuvansha 6 by Kalidas*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*